International Journal of Scientific Research in Science, Engineering and Technology
© 2018 IJSRSET | Volume 4 | Issue 4 | Print ISSN: 2395-1990 | Online ISSN : 2394-4099

# रामानुजाचार्यस्य शिक्षादर्शनम्

## (1017 तः 1137)

Prof. N. Latha
Professor, Department of Education, National Sanskrit University, Tirupati, India

**प्रस्तावना** - दार्शनिकविचारका: सर्वदा सभ्यता तथा संस्कृतिं नूतनदिशायां नयन्ति इति नास्ति अतिशयोक्ति:। नूतनविचारधाराभि: एव सामाजिक-सांस्कृतिक-धार्मिक-राजनैतिकक्षेत्रेषु समस्तप्रकारकसंशोधन, परिवर्तनं, विकासश्च सिध्यति। भिन्नभिन्नदेशयुगानां इतिहासस्य नूतनदिशा, नूतनप्रेरणां दातुं तत्तद्देशयुगविचारका: समायान्ति। एषु विचारकेषु अस्माकं देशस्य श्रीरामानुजाचार्य: विशिष्ट: महत्त्वपूर्णश्च भवति । अयं मध्ययुगस्य दार्शनिक: इति वक्तुं शक्यते। अनेन धर्मस्य तथा दर्शनस्य सुन्दरं समन्वयं कृत्वा धर्मस्य कृते अत्यन्तं हृदयग्राही तर्कसम्मतरूपं दत्तं वर्तते। स: केवलं वैष्णवधर्मप्रवर्तक: न परन्तु विशिष्ट: दार्शनिक: तात्विकपृष्ठभूमौ सुप्रतिष्ठितश्च भवतीति व्यवहर्तुं शक्यते।

## I. INTRODUCTION

रामानुजसमयस्य कृते धार्मिके सांस्कृतिके च वातावरणे धर्मसंस्कृत्यो: उभयो: समन्वय: अत्यन्तमावश्यक: आसीत् । वैष्णवधर्मस्तु बहुप्राचीन:, परन्तु बौद्धजैनधर्मयो: अत्यधिकप्रभावकारणेन गुप्तकालानन्तरं भारते वैष्णवधर्म: लुप्तप्रायोऽभवत्। अस्मिन् सन्दर्भ एव (भगवान) श्रीशंकराचार्य: श्रीरामानुजश्च वैदिकम् एवं वैष्णवधर्मस्य पुनास्थापनाया: पुनरुत्थानस्य चावश्यकतायां सत्यां प्रेरितौ अभवताम् । श्रीशंकराचार्य: वेदान्तसूत्रस्य भाष्यकार:। अनेन भारते वैदिकदर्शनं पुन: प्रतिष्ठितम्। तस्य प्रयत्नेन एव भारते बौद्ध एवं जैनधर्मस्य प्रभाव: लुप्त: परिणामतश्च वैदिकसंस्कृते: पुनरुत्थानं जातम्। शंकर: अद्वैतवादी । अस्य दर्शने सीमा: भवन्ति। दर्शनस्य तात्विकविचारधारया अत्यन्तं मान्यतां प्राप्नोति।

वैष्णवधर्मे हृदयपक्षस्य प्रबलता विद्यते यस्मिन् च नारायण: अथवा वासुदेवस्य भक्ति:, शरणागति:, प्रणति: इत्यादीनां प्राधान्यं विद्यते । अस्मिन् धर्मे तत्त्वज्ञानदार्शनिकविवेचनयोः महत्वं तु न दृश्यते । परन्तु रामानुजाचार्येण उभयोः समन्वयं कृतम् । तेन वैष्णवधर्मस्य तात्विक एवं दार्शनिकाधारोपरि व्याख्यातम् ।

अस्मिन् नाथमुनिः प्रथमः यस्य समयः किस्तोः 824 तः 924 पर्यन्तमिति ज्ञातुं शक्यते । नाथमुनेः शिष्यपरम्परायां तृतीयः यामुनायार्यः । रामानुजाचार्यश्च अस्य शिष्यः भवति स्म ।

**रामानुजाचार्यस्य जन्म एवं शिक्षा-** रामानुजाचार्यः 1017वर्षे काञ्चीपुरे भूतपुरी जन्म अलभत । अस्य प्रारम्भिकशिक्षा वेदान्तपण्डितस्त्य यादवप्रकाशस्य पार्श्वे आसीत् । परन्तु रामानुजः गुरुणा सह मतभेदं शीघ्रमेव स्पष्टं विज्ञाय यामुनाचार्यस्य शिष्यत्वं

स्वीचकार। वस्तुतः यामुनाचार्यः स्वयमेव रामानुजं शिष्यत्वेन स्वीकर्तुं ऐच्छत्। परन्तु उभावपि आचार्यौ कालः एव इत्थम् ऐनी अमेलयत् येन च उभयोः आनन्दः जातः।

यामुनाचार्य: शिष्यस्य रामानुजाचार्यस्य कृते विषयत्रयम् उपास्थापयत् यस्य अर्थश्च रामानुजेन स्पष्टीकृतं भवति । विषयस्तु मृतशरीरे अंगुलीत्रयं मुकुलितमभूत् । रामानुजः एवम् अस्पष्टयत् यत् आचार्यस्य यामुनाचार्यस्य इच्छात्रयम् अपूर्ण भवति इति । तद्यथा -

- जनैः श्रीवैष्णवधर्मस्य प्रपत्तिसिद्धान्तस्वीकारः ।
- ब्रह्मसूत्रस्य श्रीवैष्णवसिद्धान्तानुकूलं व्याख्याकरणम् ।
- श्रीवैष्णवधर्मप्रचारार्थ ग्रन्थलेखनम् इति ।

रामानुजः नूनमेव यामुनाचार्यस्य इच्छात्रयं पूरयितुं व्रतनिष्ठः, पूरितवान् च । त्रिंशे वयसि सन्यासं स्वीकृत्य रामानुजः शिक्षां दीयमानोऽऽसीत् । तस्य प्रथमगुरुः यादवप्रकाशः स्वयमेव रामानुजस्य शिष्यः अभवत् इति आश्चर्योऽयं विषयः । एवं रामानुजस्य ख्यातिः सावधानपूर्वकं वर्धमाना आसीत् शिष्यसंख्या अपि प्रवृद्धा । वेदान्तस्य विशिष्टाद्वैतवादः प्रसिद्धः जातः । एवं प्रकारेण शिष्याणां मनसि अद्वैतवादमधिकृत्य विचारः जातः इत्युक्ते विशिष्टाद्वैतं प्रति क्रमशः आकृष्टाः सञ्जाताः इति ।

**दार्शनिकसिद्धान्तः-** रामानुजः स्वसिद्धान्तानां प्रतिपादनाय बहून् ग्रन्थान् अलिखत् । तस्य प्रथमो ग्रन्थः गद्यत्रयं भवति । अनन्तरं ब्रह्मसूत्रस्य भाष्यं कृतं यच्च श्रीभाष्यनाम्ना प्रसिद्धम् अपि जातम् । अस्मिन् श्रीभाष्यग्रन्थे विशिष्टाद्वैतस्य आधारं दत्वा वेदान्तदर्शनस्य अद्वैतस्थाने विशिष्टाद्वैतसिद्धान्तप्रतिपादनं कृतम् । अतः रामानुजस्य विचारं ज्ञातुं वैष्णवधर्मस्य इतिहासज्ञानं परमावश्यकं भवति । वैष्णवधर्मः अतिप्राचीनः, वेदग्रन्थेषु विष्णुः एवं नारायणस्य उल्लेखः लभ्यते । यद्यपि वैदिकुयगे बहुदेववादः कर्मकाण्डस्य च महत्वं विद्यते परन्तु एकस्याः देवतायाः कृते एव एकाग्रता, भक्तिः इत्यादिभावना नासीत् । परन्तु कालान्तरे बहुदेववादस्थाने एवदेववादस्य परिणतिः आरब्धा फलतश्च श्रद्धामूलकभक्तेः प्रादुर्भावः जातः । एवं क्रमेण वैष्णवधर्मस्य उपास्यदेवस्य अनेकानि नामानि भवन्ति विष्णुः, नारायणः, कृष्णः, हरिः इति । एवं नारायणस्य उपासना भागवतधर्मे प्रचलिता । वासुदेवः कृष्णः वा वैष्णवानाम् उपास्यदेवः । एवं समस्तधारणाः एकत्रीभूय मानवस्य प्रत्येकस्मिन् विचारे गोपालकृष्णः, नारायणः, विष्णुः इत्यादिदेवताः प्रत्येकरूपेण प्राधान्यं लभेरन्।

भागवत अथवा सात्वतधर्मस्य भक्तिः एव मुख्याधारभूता भवति । नारायणे शरणागतिः तस्मिन् श्रद्धा, भक्तिः उपासना वा अस्य धर्मस्य मूलभूता भवति । महाभारतकाले धर्मोऽयं लोकप्रियः । गुप्तकालराज्ञः काले अपि परमभागवतग्रन्थः लिखितः । बौद्धजैनधर्माणां प्रादुर्भावः अनन्तरकाले व्यलसन् नूनमेव तेषां धर्माणां समाप्त्यवस्था जाता । यदा दक्षिणस्थ प्रमुखानाम् आल्वाराणां भक्तिरसपूर्णगीतेषु प्राचुर्य जातम् । आल्वाराणां समयः क्रिस्तोः पञ्च अथवा षष्ठमशताब्दात् (6 तः 11) एकादशशताब्दपर्यन्तं ज्ञायते । यथा आल्वाराः विशिष्टस्थानमलंकुर्वन् तथा प्रमुखाचार्याः अपि आल्वारविचाराणां प्रतिपादनं समर्थनपूर्वकं कृतवन्तः । वेदः, उपनिषद्, गीता, ब्रह्मसूत्रमिति च अस्य मतस्य आधारस्तम्भः भवति । एतेषु ग्रन्थेषु एव वैष्णवधर्मस्य वैदिकपृष्ठभूमिः प्रदत्ता वर्तन्ते । 1117 तः 1127 पर्यन्तं एते रचनाः विहिताः उपलभ्यन्ते । रामानुजस्य वेदान्तदीपः, वेदान्तसारः, वेदार्थसंग्रहः तथा गीतायाः भाष्यम् इत्यादयः प्रमुखग्रन्थाः भवन्ति । रामानुजस्य देहान्तं 1137 वर्षे 120 वयसि जातम् इति च ज्ञायते ।

**जीवस्य सत्तां प्रति (अधिकार प्रति) आचार्यमतम्-** शंकराचार्यस्य एवं समस्ताद्वैतवादिनां मते तु जीवः ब्रह्मातिरिक्तः न भवति अपि तु ब्रह्म एव उपाधिना प्रतिबिम्बितो भूत्वा जीवपदस्य वाच्यरूपेण प्रकाशते। शंकराचार्यस्य विचारे उपाधिर्नाम माया, अविद्या, अन्तःकरणं च भवति। जीवः उपाधिना एव अल्पज्ञत्वगुणैः युक्तः सन् भ्रमः तथा अज्ञानवशकारणेन महतः अधिकारात् (सत्ता) भिन्नरूपसंसारचके कर्मानुसारे भ्रमणं करोति । यदा ज्ञानं प्राप्नोति तदा उपाधिना विमोचनं प्राप्य ब्रह्मस्वरूपं प्राप्नुयात् ।

वैष्णवदर्शनेषु रामानुजस्य विशिष्टाद्वैतसम्प्रदाये जीवस्य शरीरे द्रव्यपदार्थः एकः भवति। यथा आत्मज्ञानाश्रयः ज्ञाता, कर्ता, भोक्ता, ईश्वरांशस्थिरता, अहे प्रत्ययवेद्यः नित्यं, अणुः, अनेक, एवं स्वयं प्रकाशश्च भवति । जीवः ईश्वरात् भिन्नः एवं परस्परं भिन्नौ भवतः। जीवसत्ता तु स्वाधीनं नास्ति पराधीनमेव। मोक्षावस्थायामपि जीवस्य अस्तित्वं पृथक एव भवेत् ।

माध्वमतं तु द्वैतवादं भवति। अस्मिन् जीवः सर्वथा ब्रह्मणः भिन्नः भवति। एतदनुसारं जीवात्मनि एवं ब्रह्मणि च सेव्यसेवकभावौ भवतः। एवम् अस्य मतानुसारे जीवाणुः अनेकात् ईश्वरात् भिन्नः, अस्वतन्त्रः, चेतनः, अधिकज्ञानवान, भगवतः दासश्च भवति। मोक्षावस्थायां तु वैकुण्ठप्राप्तिः भवति । मुक्तजीवः ईश्वरस्य सेवकः एव भवति इति। एवं भेदाभेदवादविचारकेषु भास्कराचार्यः प्रमुखं स्थानं वहति। अस्यानुसारं जीवः ब्रह्मांशः एव भवति। ब्रह्मणः भोक्तृशक्तिः चेतनात्मिका भवति। यस्यां च जीवस्य स्थानं प्रमुखं भवति। अत एवोच्यते यज्जीवः ब्रह्मणः शक्तिर्भवति । जीवस्तु विकाररहितः । ब्रह्मणः ध्यानेन ब्रह्मभावप्राप्तिः भवति।

जीवस्य महिमानं प्रति विभिन्नमतानि विभिन्नविचारैः च प्रोक्तानि इति वक्तुं शक्यते ।

**रामानुजस्य शैक्षिकोद्देश्यानि**

**(अ) धर्मार्थकाममोक्षाः-** भारतीयदर्शने धर्मार्थकाममोक्षः इति पुरुषार्थचतुष्टयं सुप्रसिद्धं भवति। इदमेव रामानुजेन परमोद्देश्येन स्वीकृतं यतः मानवजीवनलक्ष्यमवश्यं धर्मार्थकाममोक्षप्राप्तिरेव स्यात् इति द्रढीकृतं च।

यद्यपि आधुनिकमतानुसारं शिक्षा जीविकोपार्जनाय ज्ञानविज्ञानसाधनरूपेण मन्यते तद्विरुद्धं प्राचीनाचार्यैः मन्यते स्म। अतः रामानुजः प्रथमं लक्ष्यमेव प्रधानेन स्वीकरोति स्म इति ज्ञायते ।

**(आ) चित्तवृत्तिनिरोधः** -विशिष्टाद्वैतस्य द्वितीयं प्रमुखोद्देश्यं चित्तवृत्तिनिरोधः । मानवस्य चिर्त्त तु चंचलात्मकं भवति । चित्तस्य नियन्त्रणाय अभ्यासः आवश्यकः। पतञ्जलेः योगदर्शनं रामानुजाचार्येण अंगीकृतम्। योगशिक्षाद्वारा एव चञ्चलात्मकमनसः नियन्त्रणं साध्यते इति रामानुजमतम् ।

**(3) कर्तव्यपालनम्** - राष्ट्र–सामाजिक अथवा संस्कृतेः विकासार्थ सामाजिककर्तव्यभावना आवश्यकी। रामानुजाचार्यः राष्ट्रियविकासे योगदानं अददात्। पुस्तके प्रदत्तसैद्धान्तिकविचारापेक्षया छात्रः यथा अभ्यासद्वारा कर्तव्यपालनं कुर्यात् तथा तस्य विकासः शिक्षाद्वारा कार्यः इति रामानुजः अभिप्रति स्म ।

**(ई) पाठ्यक्रमः-** रामानुजाचार्यः परा विद्या अपरा विद्या इति उपनिषद्वर्णितविद्ययोः द्वयोः कृते प्राधान्यमददात् । परा विद्या पारलौकिक अथवा आध्यात्मिकविषयसम्बद्धा भवति । अपरा तु सांसारिक अथवा लौकिकविषयस्य शिक्षा भवति। विद्याद्वयमपि ब्रह्मतत्त्वसाधने उपकुरुतः । छात्रः आदौ अपरा विद्यामधीत्य पराविद्यायाः ज्ञानं सुलभेन प्राप्नुयात् ।

आचार्य: क्रमश: व्यावहारिकम् एवं पारमार्थिकमिति द्विप्रकारकविषयाणां महत्वं दत्तवान् ।

बाह्यरुचौ यस्य छात्रस्य प्रीति: भवति स: लौकिकविषये एव अत्यधिकम् अभिरुचि प्राप्नुयात् । यस्य च छात्रस्य आन्तरिकरुचि: वर्तते तस्य कृते आध्यात्मिकविषयै: पाठ्यवस्तुन: योजना आवश्यकी । स: आध्यात्मिकतत्त्वं विज्ञाय सफलो भवेत् । एवं रामानुजाचार्य: वैदिकोपनिषदि विद्यमानमहत्त्वपूर्णविषयांशानों शिक्षणमावश्यकमिति समर्धयति ।

**शिक्षणविधि**:- ज्ञानप्राप्तये आवश्यकतत्त्वत्रयं विद्यते। तद्यथा-

(1) ज्ञाता (2) ज्ञानस्य प्रक्रिया (3) ज्ञेयपदार्थ: इति ।

ज्ञाता नाम चैतन्यमिति व्यवहियते । ज्ञानस्य प्रक्रियायां प्रमाणचैतन्यं मन्यते । अस्यां प्रक्रियायां पष्ट श्रोतांसि भवन्ति । ते (1) प्रत्यक्ष (2) अनुमानं (3) शब्द (4) अनुभव: (5) तर्क: इति ।

शब्दस्तु आगमश्रोतद्वारा ज्ञानप्राप्ति: कार्यते यत्र च पद्धतित्रयं महत्त्वपूर्ण भजते - (1) श्रवणे (2) मननं (3) निदिद्ध्यासनम् इति ।

शब्द: श्रोतृद्वारा स्थालीज्ञानं प्रददाति । प्रत्यक्षद्वारा प्रत्यय:, पदार्थ:, प्रतीकमादीन्द्रियद्वारा ज्ञानं प्रदातुं शक्यते। अनुमानं, अनुभवतर्कद्वारा वा अभावज्ञानस्य अवबोध: सरलतया कर्तुं शक्यते । अत: छात्रस्य ध्यानं केन्द्रीकरणीयं भवति । तादृशविषयवस्तु निर्माणीयम् ।

श्रवणं तु वेदानां श्रवणं भवति । मनने स्मृति: अथवा एकाग्रताया: योगदानं भवति । निदिध्यासनद्वारा आत्मानुभूते: मार्ग: प्रशस्तो भवेत् ।

**शिक्षाप्रणाली**- रामानुजाचार्य: वैदिकशिक्षाप्रणाल्या: समर्थक: भवति स्म । पाठशालापद्धते: पुष्टि: अनेन विहिता इति ज्ञायते एवं विभिन्नसंस्कृतपाठशालासु छात्रज्ञानसम्पादनाय आदानप्रदानव्यवस्थाया: कृते बलं दत्तम्। एवं तस्य चिन्तनं जनसाधारणार्थ शिक्षाव्यवस्था आवश्यकी इति कारणेन जनशिक्षार्थ च मठानां स्थापनं कृतम् ।

रामानुज: वैष्णवधर्मस्य शिक्षाप्रदानेन स्व चतु: सप्ततिभि: शिष्यै: सह 108 स्थानेषु भ्रमणं कृत्वा अनेकमठानि स्थापितानि इति प्रशंसनीयांश: भवति । अध: प्रमुखमठानि सूचितानि । तानि यथा –

तीताद्रिमठं, वेंकटाद्रिमठं, ब्रह्मतन्त्रपरकालमठे, अहोबिलमठे, मुनित्रयमठे, श्रीरंगमठे, विष्णुकांचीमठम् इत्यादीनि भवन्ति।

**रामानुजाचार्य**:- आचार्य: रामानुजाचार्य: मृत्युसमयासन्नसमये स्वप्रियशिष्यं पाराशरनई श्रीरंगमठस्य उत्तराधिकारित्वेन न्ययोजयत् । श्रीरंगमठे, विष्णुकाशीमठ च सन्यासाश्रमत्वेन व्यवहियते । शेषमठानि तु गृहस्थमठानि भवन्ति । मृत्यो: दिनत्रयात् प्राग् स्वशिष्येभ्य: चतु:सप्ततिभ्य: उपदेश वाक्यानि प्रदत्तानि । 'उपदेशरत्नमाला' नाम्ना च प्रसिद्धा जाता।

**शिक्षक**:- रामानुजाचार्यदृष्ट्या शिक्षक: सम्पूर्णज्ञानं प्राप्तवान् स्यात् येन च छात्र: शिक्षकस्य ज्ञानं साक्षात् ग्रहीतुं योग्य: भवेत्। शिक्षाग्रहणार्थम् शिक्षकस्य व्यक्तित्वं चरित्रे उत्तमरूपेण भवितव्यं येन छात्राणां कृते शिक्षक: श्रद्धापात्रो भवेत्। वेदान्तानुसारं शिक्षकस्य सम्पूर्णज्ञानं तथा विचारश्च स्पष्टं भवेत् येन छात्राणां सन्देहनिवारणं कर्तुं शक्यते । वेदान्तशिक्षायां शिक्षाप्राप्त्यर्थं

गुरोः महत्वं परिगण्यते यतः शिष्यः परोक्षरूपेण प्रत्यक्षेण वा गुरोः अनुकरणमेव कुर्यादिति हेतोः गुरोः भाषणव्यवहारः, सहनमित्यादि समस्तांशाः अनुकरणीयाः भवन्ति। अतः शिक्षां प्राप्तुं गुरोः शिक्षकस्य वा सहयोगः अनिवार्यः भवति।

अतः रामानुजः उपनिषत्सु वर्णिततथ्यान् विचार्य एव प्रत्येकस्य छात्रस्य शिक्षाग्रहणार्थ शिक्षकस्य मनः स्वस्थं, संयमी, प्रेमभावप्रकटनयोग्यं च भवेदिति आशास्ते स्म। शिक्षाप्रक्रियायां श्रवणस्य प्रमुखं स्थानं भवति । अतः छात्रः पुस्तकपठनेन सह शिक्षकेन सह विचारविमर्शद्वारा अपि ज्ञानविकासं प्राप्नुयात्।

शिक्षकस्य अपरं योग्यता तु धर्मः अथवा कर्तव्यपालनं भवति । सः प्रतिदिनमपि अध्ययनाध्यापनादिकर्मसु क्रियाशीलो भवेत्। एवं छात्रस्य बालकाय वा व्यक्तित्वमपि यथा आदरति तथा आत्मवत् भिन्नत्वे एकत्वमिति भावनायाः प्राधान्यम् अपि दत्त्वा सफलो भवेत्।

रामानुजस्य काले एव तेन अवगतं यत् छात्रगुरोः उभयोः अपि अनुरागश्रद्धादिव्यवस्था गतिशीला नासीत् इति।

वेदान्तदर्शने सर्वे छात्राः सर्वेषां दृष्टौ समानाः, अनेकता, विभिन्नता तु मिथ्या इति कारणेन व्यावहारिकजीवने शिक्षकछात्री उभावपि जीवनपर्यन्तं जीवनव्यापारस्य निर्वाहं कुरुतः अतः अस्यां सृष्टी सत्यस्य महत्त्वं दातव्यं तथा सृष्टेः अंगरूपेण शरीरमपि सत्यमिति विचार्य समस्तजीवनम् अस्तित्वस्य सत्यमेव स्वीकरणीयं भवति । एवं व्यावहारिकदृष्टी सृष्टिकर्ता ईश्वरः एव अस्याः दृश्यजगतः निर्माता इत्यपि परिगण्यतेऽस्माभिः । अस्यां दृष्टी एव प्रत्येके बालकमपि भिन्नत्वेन परिशील्य तस्य व्यक्तित्वं निम्नपक्षोपरि विचारणीयं भवतीति रामानुजः अभिप्रति स्म-

- बालकशरीरमेव व्यावहारिकसत्ता भवति ।

- भौतिकवातावरणमेव बालकस्य शारीरिक एवं मानसिकविकासे प्रभावयति, अस्तित्वे अपि अस्ति ।

- आत्मा तु वास्तविकसत्ता या च ब्रह्मणः अंशः भवति । अत्र रामानुजाचार्यः शंकरस्य पारमार्थिकसत्तापेक्षया व्यावहारिकदृष्टौ एवं सत्यस्य वैशिष्टये दत्तम् । अस्य मतानुसारं बालकस्य आत्मा तथा शरीरम् इति उभयोः अस्तित्वं तु सत्यमेव भवति । आत्मापरमात्मनोः अभेदः केवलम् अस्मिन्नर्थे स्वीकरणीयं यत् जीवानां कृते स्वतन्त्र अस्तित्वं न भवति यतः ईश्वरः एव सर्वेषामपि 'उद्गमः भवति ।

रामानुजः 'ब्रह्म चिचित्' इति तत्त्वद्वयसंयुक्तं भवति यत् च एकमात्रसत्ता भवति अर्थात् स्वतन्त्ररूपेण कस्यापि वस्तुनः सत्ता न भवति, परन्तु अस्मिन् चित् (जीवः) तथा अचित् जडप्रकृतिः च वास्तविकं भवति। अनेन कारणेन एवं रामानुजः अद्वैतसिद्धान्तस्य विशिष्टाद्वैतवादसंज्ञां प्रदत्तवान् । यतः यद्यपि ब्रह्म एक एव भवति परन्तु चित् अचित् इति प्रत्येकवैशिष्ट्यं तु निरूपितमत्र इति रामानुजः विशिष्टतां याति इत्यत्र न लेशोऽपि संशयः विद्यते ।

रामानुजाचार्यमतानुसारेण प्रत्येकबालकस्य कृते यथार्थशरीरं विद्यते यस्मिन् अन्तर्निहितात्मा अपि यथार्थ भवति । अतः रामानुजः बालकस्य भिन्न- अस्तित्वमेव स्वसिद्धान्ते जग्राह यतः प्रत्येकबालकस्य स्वतन्त्रता अस्तित्वे भवति तस्य स्वातन्त्र्यं तस्य 'इच्छाशक्तिः' भवति, तस्य अद्वितीयव्यक्तित्वमपि अस्ति एवं तस्मिन् दैवीसत्ता विद्यते । शरीरम् आत्मा च ईश्वरेण निर्मितं अतः ईश्वरांशः एव भवति अत एव उभावपि पवित्रं देवी च भवति इति वक्तुं शक्यते । मनुष्यशरीरं मन्दिरसदृशं यस्मिन् देवतायाः प्रतिमा विराजते । अस्य शरीरस्य अशुद्धकरणेन एव आत्मनः प्रकाशः अवरुद्धो भवेत् । इन्द्रियजनितविकारेण मानसिककालुष्यं ईर्ष्या, द्वेष, मोह, लोभादि दुर्विचारैः शारीरिकमालिन्यं जनयतीति निःसन्देहास्पदम् । एतेन कारणेन एव आत्मनः

प्रकाशावरोधौ सहायकसिद्धं च भवति शारीरिकमालिन्यम् इत्यपि वक्तुं शक्यते । ईदृशरूपशरीरस्य मालिन्यकरणं नाम ईश्वराय अगौरवं दत्तमिव विचारणीयम् ।

यद्यपि बालकः अपूर्णः परन्तु निरन्तरम् अग्रे गन्तुं विकासं प्राप्तुं च क्षमतायुक्तो भवति । रामानुजस्य कथनं तु एतदपेक्षया कदाचित् बालकः स्वयमेव पूर्णतां प्राप्तुम् अवसरमपि प्राप्नुयात् । अनेन तस्य पूर्णविकासः अवश्यं स्थिरतां याति । ब्रह्म एव पूर्णः अतः तस्य आंशिकरूपो सदैव पूर्णताप्राप्त्यै प्रगतिपथमन्विषति इति रामानुजः स्वसिद्धान्तं द्रढयति ।

वैयक्तिक 'स्व' एवं साहचर्य, इच्छा-अनिच्छा, कामना-हेतुकतादि- प्रमुखसंरचनानां प्रमुखतत्त्वानां परीक्षणं वैज्ञानिकरीत्या कर्तुं शक्यते । यद्यपि इयं वैज्ञानिकसंरचना परिवर्तनशीला परन्तु ईश्वरः अनेन परिवर्तनेन परं भवति इत्युक्ते भिन्नो भवेत् । साररूपेण तु जीवः आत्मना संयुक्तो भवति परन्तु जीवः, आत्मा एकमेव न भवति । जीवः मनोवैज्ञानिकांशः, आत्मा तु अत्युत्तमं भवति । जीवस्य अध्ययनम् अन्तर्दर्शनद्वारा कर्तुं शक्यते परन्तु आत्मा ज्ञेयविषयं न परन्तु वैयक्तिकजीवस्य कर्मणः कर्ता एवं फलभोक्ता च भवति । एवं स्वकामनां निर्वह्य लक्ष्यप्राप्त्यर्थ प्रयत्नशीलो च भवति ।

## उपयुक्तग्रन्थसूची


1. प्राचीन भारत के शिक्षा मनीषी, राम शकल पाण्डेय, शारदा पुस्तक, मंदिर, इलाहाबाद
2. उदीयमान भारतीय समाज में शिक्षा, डा. रामपाल सिंह वर्म, के. सुधा, विनोद पुस्तक मंदिर, आगरा
3. शिक्षा के दार्शनिक एवं सामाजिक आधार, गुरुसरनदास त्यागी, विनोद पुस्तक मंदिर, आगरा